# Datta Manasa Puja

# દત્તમાનસપૂજા

## Document Information

Text title : Datta Manasa Puja

File name : dattamAnasapUjA.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI, pUjA

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# દત્તમાનસપૂજા

પરાનન્દમયો વિષ્ણુર્હૃત્સ્થોऽવેદ્યોऽપ્યતીન્દ્રિયઃ ।
સદા સમ્પૂજ્યતે ભક્તૈર્ભગવાન્ ભક્તિભાવનઃ ॥ ૧॥

અચિન્ત્યસ્ય કુતો ધ્યાનં કૂટસ્થાવાહનં કુતઃ ।
ક્વાસનં વિશ્વસંસ્થસ્ય પાદ્યં પૂતાત્મનઃ કુતઃ ॥ ૨॥

ક્વાનર્ઘોરુક્રમસ્યાર્ઘ્યં વિષ્ણોરાચમનં કુતઃ ।
નિર્મલસ્ય કુતઃ સ્નાનં ક્વ નિરાવરણેऽમ્બરમ્ ॥ ૩॥

સ્વસૂત્રસ્ય કુતઃ સૂત્રં નિર્મલસ્ય ચ લેપનમ્ ।
નિસ્તૃષઃ સુમનોભિઃ કિં કિમક્લેદ્યસ્ય ધૂપતઃ ॥ ૪॥

સ્વપ્રકાશસ્ય દીપૈઃ કિં કિં ભક્ષ્યાદ્યૈર્જગદ્ભૃતઃ ।
કિં દેયં પરિતૃપ્તસ્ય વિરાજઃ ક્વ પ્રદક્ષિણાઃ ॥ ૫॥

કિમનન્તસ્ય નતિભિઃ સ્તૌતિ કો વાગગોચરમ્ ।
અન્તર્બહિઃપ્રપૂર્ણસ્ય કથમુદ્વાસનં ભવેત્ ॥ ૬॥

સર્વતોऽપીત્યસમ્ભાવ્યો ભાવ્યતે ભક્તિભાવનઃ ।
સેવ્યસેવકભાવેન ભક્તૈર્લીલાનૃવિગ્રહઃ ॥ ૭॥

તવેશાતીન્દ્રિયસ્યાપિ પારમ્પર્યાશ્રુતાં તનુમ્ ।
પ્રકલ્પ્યાશ્માદાવર્ચન્તિ પ્રાર્ચયેऽર્ચાં મનોમયીમ્ ॥ ૮॥

કલસુશ્લોકગીતેન ભગવન્દત્ત જાગૃહિ ।
ભક્તવત્સલ સામીપ્યં કુરુ મે માનસાર્ચને ॥ ૯॥

શ્રીદત્તં ખેચરીમુદ્રા-મુદ્રિતં યોગિસદ્ગુરુમ્ ।
સિદ્ધાસનસ્થં ધ્યાયેऽભી-વરપ્રદકરં હરિમ્ ॥ ૧૦॥

દત્તાત્રેયાહ્વયામ્યત્ર પરિવારૈઃ સહાર્ચને ।
શ્રદ્ધાભક્ત્યેશ્વરાગચ્છ ધ્યાતધામ્નાઞ્જસા વિભો ॥ ૧૧॥

સૌવર્ણં રત્નજડિતં કલ્પિતં દેવતામયમ્ ।
રમ્યં સિંહાસનં દત્ત તત્રોપવિશ યન્ત્રિતે ॥ ૧૨॥

પાદ્યં ચન્દનકર્પૂર-સુરભિ સ્વાદુ વારિ તે ।
ગૃહાણ કલ્પિતં તેન દત્તાઙ્ઘ્રી ક્ષાલયામિ તે ॥ ૧૩॥

ગન્ધાબ્જતુલસીબિલ્વ-શમીપત્રાક્ષતાન્વિતમ્ ।
સામ્બ્વર્ઘ્યં સ્વર્ણપાત્રેણ કલ્પિતં દત્ત ગૃહ્યતામ્ ॥ ૧૪॥

સુસ્વાદ્વાચમનીયામ્બુ હૈમપાત્રેણ કલ્પિતમ્ ।
તુભ્યમાચમ્યતાં દત્ત મધુપર્કં ગૃહાણ ચ ॥ ૧૫॥

પુષ્પવાસિતસત્તૈલમઙ્ગેષ્વાલિપ્ય દત્ત ભોઃ ।
પઞ્ચામૃતૈશ્ચ ગાઙ્ગાદ્ભિઃ સ્નાનં તે કલ્પયામ્યહમ્ ॥ ૧૬॥

ભક્ત્યા દિગમ્બરાચાન્તજલેદં દત્ત કલ્પિતમ્ ।
કાષાયપરિધાનં તદ્ ગૃહાણૈણેયચર્મ ચ ॥ ૧૭॥

નાનાસૂત્રધરૈતે તે બ્રહ્મસૂત્રે પ્રકલ્પિતે ।
ગૃહાણ દૈવતમયે શ્રીદત્ત નવતન્તુકે ॥ ૧૮॥

ભૂતિમૃત્સ્નાસુકસ્તૂરી-કેશરાન્વિતચન્દનમ્ ।
રત્નાક્ષતાઃ કલ્પિતાસ્ત્વામલઙ્કુર્વેઽથ દત્ત તૈઃ ॥ ૧૯॥

સચ્છમીબિલ્વતુલસી-પત્રૈઃ સૌગન્ધિકૈઃ સુમૈઃ ।
મનસા કલ્પિતૈર્નાનાવિધૈર્દત્તાર્ચયામ્યહમ્ ॥ ૨૦॥

લાક્ષાસિતાભ્રશ્રીવાસ-શ્રીખણ્ડાગરુગુગ્ગુલૈઃ ।
યુક્તોઽગ્નિયોજિતો ધૂપો હૃદા સ્વીકુરુ દત્ત તમ્ ॥ ૨૧॥

સ્વર્ણપાત્રે ગોઘૃતાક્ત-વર્તિપ્રજ્વાલિતં હૃદા ।
દીપં દત્ત સકર્પૂરં ગૃહાણ સ્વપ્રકાશક ॥ ૨૨॥

સષડ્રસં ષડ્વિધાન્નં નૈવેદ્યં ગવ્યસંયુતમ્ ।
કલ્પિતં હૈમપાત્રે તે ભુઙ્ક્ષ્વ દત્તામ્બ્વદઃ પિબ ॥ ૨૩॥

પ્રક્ષાલ્યાસ્યં કરૌ ચાદ્ભિર્દત્તાચમ્ય પ્રગૃહ્યતામ્ ।
તામ્બૂલં દક્ષિણાં હૈમીં કલ્પિતાનિ ફલાનિ ચ ॥ ૨૪॥

નીરાજ્ય રત્નદીપૈસ્ત્વાં પ્રણમ્ય મનસા ચ તે ।
પરિતસ્ત્વત્કથોદ્ઘાતૈઃ કુર્વે દત્ત પ્રદક્ષિણાઃ ॥ ૨૫॥

મન્ત્રવન્નિહિતો મૂર્ધ્ની દત્ત તે કુસુમાઞ્જલિઃ ।
કલ્પ્યન્તે મનસા ગીત-વાદ્યનૃત્યોપચારકાઃ ॥ ૨૬॥

પ્રેર્યમાણપ્રેરકેણ ત્વયા દત્તેરિતેન તે ।
કૃતેયં મનસા પૂજા શ્રીમંસ્તુષ્ટો ભવાનયા ॥ ૨૭॥

દત્ત માનસતલ્પે મે સુખનિદ્રાં રહઃ કુરુ ।
રમ્યે વ્યાયતભક્ત્યામતૂલિકાઢ્યે સુવીજિતે ॥ ૨૮॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતા દત્તમાનસપૂજા સમ્પૂર્ણા ।

---

*Datta Manasa Puja*
pdf was typeset on May 12, 2021

Please send corrections to *sanskrit@cheerful.com*